Topic 76

## हलन्त पुंल्लिंग तकारान्त शब्द

सान्त महतः संयोगस्य ।

सान्तसंयोगस्य महतश्च यो नकारः, तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने । महान्, महान्तौ महान्तः । हे महन् ! महद्भ्याम् ।

अत्वसन्तस्य चाधातोः ।

अत्वन्तस्योपधाया दीर्घो धातुभिन्नासन्तस्य चाऽसम्बुद्धौ सौ परे । धीमान्, धीमन्तौ, धीमन्तः । हे धीमन् ! शसादौ महद्वत् ।

भातेर्डवतुः । डित्वसामर्थ्यादभस्यापि टेर्लोपः । भवान्, भवन्तौ, भवन्तः । शत्रन्तस्य भवन् ।

उभे अभ्यस्तम् ।

षाष्ठद्वित्व प्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्त संज्ञे स्तः ।

अष्टाध्यायी में द्वित्व प्रकरण दो हैं — एक छठे अध्याय में और दूसरा आठवें अध्याय में । पहला छठे अध्याय के प्रथम पाद के प्रथम सूत्र 'एकाचो द्वे प्रथमस्य' से लेकर ~~बारहवें~~ बारहवें सूत्र तक है । दूसरा द्वित्व प्रकरण आठवें अध्याय के प्रथम पाद के प्रथम सूत्र सर्वस्य द्वे । षैसा होता है, आठवें अध्याय में नहीं ।

नाऽभ्यस्ताच्छतुः ।

अभ्यस्तात् परस्य शतुर्नुम न स्यात् ।
ददत्, ददद् । ददतौ । ददतः ।

जक्षित्यादयः षट् ।

षड् धातवोऽन्ये जक्षितिश्च सप्तम एतेऽभ्यस्तसञ्ज्ञाः स्युः । जक्षत्, जक्षतौ, जक्षतः ।

एवं जाग्रत्, दरिद्रत्, शासत्, चकासत् ।

गुप्, गुब् । गुपौ । गुपः । गुब्भ्याम् ।